# O. P. JINDAL SCHOOL, SAVITRI NAGAR

**Annual Examination (2023– 2024)**

**Class IX** — **MM: 80**

**Subject: Sanskrit** — **Time: 3. Hrs.**

Name: ____________ Roll No.:__________

***(Fifteen Minutes Extra will be given for reading the Question Paper.)***

***General Instructions: All questions are compulsory***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड क | अपठित अवबोधनम् | (10 अङ्काः) |
| खण्ड ख | रचनात्मकं कार्यम् | (15 अङ्काः) |
| खण्ड ग | अनुप्रयुक्तव्याकरणम् | (25 अङ्काः) |
| खण्ड घ | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

## (खण्ड–क) अपठित अवबोधनम्

**प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **(10)**

(निम्नलिखित गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर संस्कृत भाषा में लिखिए)

एकदा एका पंचदशवर्षीया बालिका पित्रा सह मेलकं द्रष्टुं नगरं प्रति गच्छति स्म। सा चतुरमतिः धैर्यशालिनी च आसीत्। सा बाल्यकाले एव विविधासु विद्यासु पारंगता आसीत्। मार्गे एका नदी आसीत्। सा नौकया गच्छति स्म। नौकायाम् अनेकाः जनाः आसन्, नद्यां एकः मकरः आसीत्। तत्र द्वौ जनौ तस्मात् मकरात् भीतौ जले पतितौ। तयोः मुखे भयस्य छाया आसीत्। सा अपि भीता असीत् परन्तु सा अचिन्तयत्– तयोः जनयोः रक्षणं कथं करणीयम् ? सा जले अकुर्दत् तयोः च जनयोः हस्तौ गृहीत्वा नौकां प्रति आनयत्। सा तयोः रक्षणम् अकरोत्। सा साहसी बालिका लक्ष्मीबाई असीत्। एतस्यै बीरबालायै नमः।

**I एकपदेन उत्तरत** – *(केवलं प्रश्नद्वयम्)* **(1X2=2)**

**i** मकरः कुत्र आसीत् ?

**ii** बालिका केन सह गच्छति स्म ?

**iii** द्वौ जनौ मकरात् भीतौ कुत्र पतितौ ?

**II पूर्णवाक्येन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(2X2=4)**

**i** सा बालिका का आसीत् ?

**ii** बालिका कीदृशी आसीत् ?

**iii** भीतापि बालिका किम् अचिन्तयत् ?

**III** *अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।* *(1X1=1)*

*(इस अनुच्छेद का उचित शीर्षक लिखिए)*

**IV** **यथानिर्देशम् उत्तरं लिखत–** *(केवलं प्रश्नत्रयम्)* **(1X3=3)**

**i** 'सा तयोः रक्षणम् अकरोत्' वाक्येऽस्मिन् 'अकरोत्' इति क्रियापदस्य कर्तृपदम् किम् ?

(क) सा (ख) अकरोत्

(ग) तयोः (घ) रक्षणम्

**ii** 'बुद्धिमतिः' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) धर्यशालिनी (ख) चतुरमतिः

(ग) लक्ष्मीबाई (घ) बालिका

**iii** 'साहसी बालिका' अनयोः पदयोः विशेष्य पदं किम् ?

(क) बालकैः (ख) बाली

(ग) बालिका (घ) साहासी

**iv** 'सलिले' इत्यर्थे अनुच्छेदे किं पदम् प्रयुक्तम् ?

(क) मुखे (ख) जनाः

(ग) नदी (घ) जले

## (खण्ड–ख) रचनात्मकं–कार्यम्

**प्र0 2 भवान् सोमेन्द्रः। स्वविद्यालयस्य वार्षिकोत्सवस्य वर्णनं कुर्वन् भवान् मित्रं प्रति पत्रं लिखति। मंजूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा पुनः पत्रं लिखत। (½X10=5)**

( आप सोमेन्द्र हैं। अपने विद्यालय के वार्षिकोत्सव का वर्णन करते हुए अपने मित्र को लिखे गए पत्र को पुनः लिखिए।)

परीक्षा भवनम् दिनांकः __________

पल्लवपुरम्, महाराष्ट्रम्

प्रिय मित्र!

सस्नेहं (1) –––––––

अत्र (2) ––––––– तत्रास्तु। मित्र अस्माकं (3) ––––––– वार्षिकोत्सवः (4) ––––––– मासस्य द्वाविंशतितारिकायाम् महता (5) ––––––– मानितः। अस्माकं प्रदेशस्य (6) ––––––– मुख्यातिथिः आसीत्। अस्मिन् अवसरे अनेके (7) ––––––– आयोजिताः। मुख्यातिथिः (8) ––––––– विशेषेण प्राशंसत्। प्रधानाचार्यः कार्यक्रमस्य अन्ते स्वविद्यालयस्य (9) ––––––– अपठत्। अन्ते योग्येभ्यः छात्रेभ्यः पारितोषिकानि अयच्छत्।

भवदीयः मित्रम्

(10) –––––––

| |
|---|
| हर्षेण, नमोनमः, कार्यक्रमाः, दिसम्बर, कुशलं, प्रगतिवेदनम्, विद्यालये, मुख्यमंत्री, संस्कृतकार्यक्रमम्, सामेन्द्रः, |

**प्र03 मंजूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत–** **(1X5=5)**

(चित्र को देखकर मंजूषा की सहायता से पाँच वाक्यों में संस्कृत में चित्रवर्णन कीजिए)



| |
|---|
| खेलस्य, क्षेत्रम्, बलिष्ठाः, स्टेडियम, खेलं, विजेतुम्, भवनं, क्रीडकाः, प्रतिद्वन्द्विनः, कबड्डी, अपि, दर्शकाः, उत्साहेन, सर्वे, सप्त, एकस्मिन्, दले, अंकेन, अस्माकं, भारतीयाः, एव, पराजयः, वर्तते, |

**प्र0 4 अधोलिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत– (पंच वाक्यानि)** **(1x5=5)**

(निम्नलिखित किन्ही पाँच वाक्यों का संस्कृतभाषा में अनुवाद कीजिए)

**क)** नववर्ष की हार्दिक शुभकामनाएं।

**ख)** विद्या से विहीन मनुष्य पशु होता है।

**ग)** वृक्ष प्राणवायु देते हैं।

**घ)** वह धीरे–धीरे चलता है।

**ङ)** आज बहुत गर्मी है।

**च)** मैं प्रतिदिन व्यायाम करता हूँ।

**छ)** श्वेतकेतु आरुणि के पुत्र थे ।

## (खण्ड–ग) अनुप्रयुक्तव्याकरणम्

**प्र0 5 अधोलिखितवाक्येषु स्थूलपदानां संधि–विच्छेदं वा प्रदत्तः विकल्पेभ्यः चित्वा लिखत–**
*(केवलं प्रश्नचतुष्टयम्)* **(1X4=4)**

i **मात्रादेशः** सदा पालनीयाः।

(क) मात्र + आदेशः (ख) मातृ + आदेशः
(ग) मातुः + आदेशः (घ) मातर् + आदेशः

ii **अत्र + एकः** बालः पठन् आसीत्।

(क) अत्रेकः (ख) अत्राकः
(ग) अत्रैकः (घ) आत्रकः

iii **यद्यपि** त्वं वीरः असि।

(क) यदि + अपि (ख) यद्य + अपि
(ग) यदि + पि (घ) यद् + अपि

iv शशांकः **सर्वोदयः** विद्यालये पठति।

(क) सर्वो + दयः (ख) सर्व + ऊदय
(ग) सर्व + उदयः (घ) सर्व + ओदाय

v **नौ + इकः** नद्यां नौकां चालयति।

(क) नौविकः (ख) नाविकः
(ग) नोवेकः (घ) नाइकः

**प्र0 6 उचितानि शब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत**–*(केवलं प्रश्नचतुष्टयम्)* **(1x4=4)**
(विकल्पों से उचित शब्दरूप चुनकर रिक्तस्थानपूर्ति कीजिए)

i तस्मै ––––– मोदकं रोचते।

(क) बालकैः (ख) बालकाय
(ग) बालकाः (घ) बालकान्

ii अद्य ––––––– जन्मदिवसः अस्ति।

(क) मम (ख) अहम्
(ग) वयम् (घ) आवयोः

Iii ––––––– अनेकानि सुन्दराणि पुष्पाणि सन्ति।

(क) वाटिका (ख) वाटिकया
(ग) वाटिकायां (घ) वाटिकेन

iv सकलः संसारः ––––––– प्रकाशितः भवति।

(क) सूर्याय (ख) सूर्यस्य
(ग) सूर्यात् (घ) सूर्येण

v ––––––––– बहिः जलाशयः अस्ति।

(क) ग्रामेण (ख) ग्रामात्
(ग) ग्रमेषु (घ) ग्रामस्य

**प्र0 7 उचितानि धातुरूपाणि चित्वा रिक्तस्थानानि पूरयत**–(केवलं प्रश्नचतुष्टयम्) **(1X4=4)**
(विकल्पों से उचित धातुरूप चुनकर रिक्तस्थानपूर्ति कीजिए)

**i** गीता रमा च तत्र ------- ।

(क) पठतः (ख) पठथः
(ग) पठन्ति (घ) पठामि

**ii** वाल्मीकिः रामायणस्य रचनाम् ------ ।

(क) अकरवम् (ख) अकुर्वन्
(ग) अकरोत् (घ) अकुरुताम्

**iii** परमवीराः पाण्डवाः पंच -------।

(क) आसीत् (ख) आसन्
(ग) आस्ताम् (घ) आस्तम्

**iv** तौ सायंकाले भ्रमितुम् ------- ।

(क) गच्छथः (ख) गच्छतः
(ग) गच्छति (घ) गच्छन्ति

**v** श्व देवदत्तस्य उपनयनं ------- ।

(क) भविष्यथः (ख) भवेत्
(ग) भविष्यति (घ) अभवत्

**प्र0 8 निम्नलिखितवाक्येषु विकल्पेभ्यः उचितपदं चित्वा लिखत**–(केवलं प्रश्नचतुष्टयं) **(1X4=4)**
(विकल्पों से उचित शब्दरूप चुनकर रिक्तस्थानपूर्ति कीजिए)

**i** त्वं ------- विना कथं पठिष्यसि ।

(क) पुस्तकात् (ख) पुस्तकस्य
(ग) पुस्तकयोः (घ) पुस्तके

**ii** अयं धनराशिः ------- अस्ति।

(क) उत्सवस्य (ख) उत्सवम्
(ग) उत्सवे (घ) उत्सवाय

**iii** पश्य! पश्य! ------- परितः पुष्पाणि न सन्ति।

(क) विद्यालयः (ख) विद्यालयम्
(ग) विद्यालयस्य (घ) विद्यालये

**iv** इयं शान्तिसभा, अलम् ------- ।

(क) कोलाहले (ख) कोलाहलम्
(ग) कोलाहलेन (घ) कोलाहलात्

**v** मनोजः ------- बधिरः अस्ति।

(क) कर्णम् (ख) कर्णात्
(ग) कर्णः (घ) कर्णेन

**प्र0 9 प्रदत्तः विकल्पेभ्यः उचितानि प्रत्ययानि चित्वा लिखत–** **(1x3=3)**

(विकल्पों से उचित प्रत्ययरूप चुनकर रिक्तस्थानपूर्ति कीजिए)

i श्यामः **कथयितुम्** तत्परः अस्ति।

(क) कथ् + तुम् (ख) कथ् + तुमुन्

(ग) कथि + तूमुन (घ) कथयि + तुम्

ii रामः शिवम् **पूज् + क्तवतु** ।

(क) पूजतवान् (ख) पूजितवती

(ग) पूजितवात् (घ) पूजितवान्

iii सा बालिका घटे जलम् **आदाय** गृहं गच्छति।

(क) आ + दा + आय् (ख) आ + दी + ल्यप्

(ग) आ + दा + ल्यप् (घ) आद् + आय

iv **भ्रम् + शतृ** सः परिश्रान्तः अभवत्।

(क) भ्रमन् (ख) भ्रमता

(ग) भ्रमत् (घ) भ्रमन्तः

**प्र0 10 अधोलिखित वाक्येषु उचित संख्यारूपैः रिक्तस्थानानि पूरयत–** **(½ x 4=2)**

(विकल्पों से उचित संख्याशब्दरूप चुनकर रिक्तस्थानपूर्ति कीजिए)

i सः बालकः ————(1) पत्रम् लिखति।

ii ————(18) पुराणानि सन्ति।

iii एकस्मिन् वर्षे ————(12)मासाः भवन्ति ।

iv मम पार्श्वे ————(4) पुस्तकानि सन्ति।

**प्र0 11 अधोलिखित रेखांकितपदानां प्रयुक्तान् उपसर्गान् लिखत–** **(½ x 4=2)**

(रेखांकित स्थूलशब्दों से उपसर्ग को पृथक् कीजिए )

i सीता रामम् **अनुगच्छति**।

ii तडागे कमलानि **सुशोभन्ते**।

iii अध्यापकः विद्यालयात् **निर्गच्छति**।

iv ज्ञानस्य **प्रसारः** करणीयम्।

**प्र0 12 वाक्यानुगुणम् उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत–** **(½ x 4=2)**

(विकल्पों से उचित अव्ययपद चुनकर रिक्तस्थानपूर्ति कीजिए)

i अहं ——— त्वया सह गन्तुम् इच्छामि।

(क) अपि (ख) तथा

(ग) कदा (घ) ह्यः

ii त्वम् अधुना ——— गच्छसि ?

(क) कदा (ख) कुत्र

(ग) तदा (घ) एव

iii ——— अशोक नाम राज आसीत्।

(क) कदापि (ख) तावत्

(ग) पुरा (घ) कथम्

iv ——— मंगलवासरः भविष्यति।

(क) अद्य (ख) श्व

(ग) किम् (घ) ह्यः

## (खण्ड–घ) पठित–अवबोधनम्

**प्र0 13 अधोलिखितम् अनुच्छेदं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर लिखिए)

प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः, तर्पयति च सुखसाधनैः। पृथिवी, जलं, तेजो, वायुः, आकाशश्चास्याः प्रमुखानि तत्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति। आव्रियते परितः समन्तात् लोकोऽनेनेति पर्यावरणम्। यथा अजातश्शिशुः मातृगर्भे सुरक्षितस्तिष्ठति तथैव मानवः पर्यावरणकुक्षौ। परिष्कृतं प्रदूषणरहितं च पर्यावरणमस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्यसंकल्पं मांगलिकसामग्रींच प्रददाति। प्रकृतिकोपैः आतंकितो जनः किं कर्तुं प्रभवति ? जलप्लावनैः, अग्निभयैः, भूकम्पैः वात्याचक्रैः, उल्कापातादिभिश्च सन्तप्तस्य मानवस्य क्व मङ्गलम्।

I **एकपदेन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(½x2=1)**

i प्रकृति कैः पोषयति ?

ii मातृगर्भे कः सुरक्षितः तिष्ठति ?

iii सर्वेषां प्राणिनां संरक्षणं का करोति ?

II **पूर्णवाक्येन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(1x2=2)**

i प्रकृतिः कथं रक्षणं करोति ?

ii कैः आतंकितो जनः किं कर्तुं प्रभवति ?

iii प्रकृतेः प्रमुखानि तत्वानि कानि सन्ति ?

**III** **निर्देशानुसारं लिखत–** *(केवलं प्रश्नद्वयम्)* **(1x2=2)**

i 'पर्यावरणम्' अस्मिन् पदे कः उपसर्गः वर्तते ?

ii 'विविधैः' इति विशेषणपदस्य गद्यांशे विशेष्यपदं किम् ?

iii 'मिलित्वा' अस्मिन् पदे कः प्रत्ययः वर्तते ?

**प्र0 14 अधोलिखितं श्लोकं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित श्लोकों को ध्यान से पढ़कर प्रश्नों के उत्तर लिखिए)

स भग्नधन्वा विरथो हताश्वो हतसारथीः।

अङ्केनादाय वैदेहीं पपात भुवि रावणः ।।

संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः।

तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः।।

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।

वामबाहून्दश तदा व्यपाहरदरिन्दमः ।।

**I** **एकपदेन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(½x2=1)**

i कः क्रोधमूर्च्छितः अभवत् ?

ii विरथो भूत्वा रावणः कुत्र अपपत् ?

iii भग्नधन्वा हताश्वः कः अभवत ?

**II** **पूर्णवाक्येन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(1x2=2)**

i अङ्केनादाय वैदेहीं रावणः कुत्र पपात ?

ii रावणः काम् अङ्के आदाय भुवि अपपत् ?

iii भग्नधन्वा, विरथो, हताश्वो हतसारथिः कः अभवत् ?

**III** **यथानिर्देशम् उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(1x2=2)**

i "मामेन अङ्के" पदयोः विशेषण पदं किम् ?

ii "पृथ्वी" इति पदस्य श्लोके समानार्थकं पदं किम् ?

iii "मित्रम्" इति पदस्य विलोमपदं पद्यांशे किं प्रयुक्तम् ?

**प्र015 अधोलिखितम् नाट्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित नाट्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर लिखिए)

**आरुणिः** – वत्स! अशितस्य तेजसा योऽणिष्ठः सा वाक्। सौम्य! मनः अन्नमयं, प्राणः आपोमयः वाक् च तेजोमयी भवति इत्यप्यवधार्यताम्।

**श्वेतकेतुः** – भगवन्! भूय एव मां विज्ञापयतु।

**आरुणिः** – सौम्य! सावधानं श्रृणु। मथ्यमानस्य दध्नः योऽणिमा, स ऊर्ध्वः समुदीषति। तत्सर्पिः भवति।

**श्वेतकेतुः** – भगवन्! व्याख्यातं भवता घृतोत्पत्तिरहस्यम्। भूयोऽपि श्रोतुमिच्छामि।

**आरुणिः** – एवमेव सौम्य! अश्यमानस्य अन्नस्य योऽणिमा, स ऊर्ध्वः समुदीषति। तन्मनो भवति। अवगतं न वा ?

**श्वेतकेतुः** – सम्यगवगतं भगवन्!

**आरुणिः** – वत्स! पीयमानानाम् अपां योऽणिमा स ऊर्ध्वः समुदीषति। स एव प्राणो भवति।

**I एकपदेन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(½x2=1)**

i अशितस्य तेजसा योऽणिष्ठः सा का ?

ii मथ्यमानस्य दध्नः योऽणिमा, स ऊर्ध्वः समुदीषति। तत् किं भवति ?

iii श्वेतकेतुः कस्य शिष्यः आसीत् ?

**II पूर्णवाक्येन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(1x2=2)**

i अश्यमानस्य अन्नस्य योऽणिमा, स ऊर्ध्वः समुदीषति। तत् किं भवति ?

ii घृतस्य उत्पत्तिरहस्यम् किम् ?

iii वाक्, प्राणः मनश्च कीदृशानि भवन्ति ?

**III यथानिर्देशम् उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(1x2=2)**

i 'इत्यप्यवधार्यताम्' अस्य पदस्य कः सन्धिच्छेदः वर्तते ?

ii 'विज्ञापयतु' अस्मिन् पदे कः उपसर्गः वर्तते ?

iii 'सौम्य' इति पदम् कस्मै प्रयुक्तम् ?

**प्र0 16 स्थूलपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत–** (केवलं चतुष्टयम्) **(1X4=4)**

(स्थूलपदों के आधारपर निम्नवाक्यों को प्रश्ननिर्माण कीजिए)

i **भवता** घृतोत्पत्तिरहस्यं व्याख्यातम्।

ii **वृक्षकर्तनात्** शुद्धवायुः न प्राप्यते।

iii पुरुषः **नद्यां** सिकताभिः सेतुं निर्मातुं प्रयतते।

iv सः महतीं **वैदुषीं** लब्धवान्।

v मल्लिका **सखीभिः** सह धर्मयात्रायै गच्छति स्म।

**प्र0 17 निम्नलिखित श्लोकयोः अन्वयं मंजूषा सहायतया पुनः लिखत–** **(½X4=2)**

(निम्नश्लोकों को मंजूषा की सहायता से रिक्तस्थानों व अन्वय को पूरा कीजिए)

**(क)** रामो बबन्ध यं सेतुं शिलाभिर्मकरालये।

विदधद् बालुकाभिस्तं यासि त्वमतिरामताम्।।

**अन्वयः** – (1) ––––––– बबन्ध यं (2) ––––––– शिलाभिर्मकरालये विदधद्

(3) ––––––– तं यासि त्वमति (4) ––––––––।

**(ख)** वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी। **(½X4=2)**

न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि।।

**अन्वयः** – अहम् (1) ––––––– त्वम् युवा धन्वी (2) ––––––– कवची शरी

च अपि मे (3) ––––––– आदाय (4) ––––––– न गमिष्यसि।

| |
|---|
| वृद्धः, रामताम्, सरथः, बालुकाभिः, कुशली, सेतुं, वैदेहीं, रामः |

**प्र0 18 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य पुनः लिखत–** **(½X8=4)**

( निम्नलिखित घटनाक्रम को उचित क्रमानुसार पुनः लिखिए।)

**i)** एकदा माता स्थाल्यां तण्डुलान् निक्षिप्यति।

**ii)** पुरा कस्मिश्चिद् ग्रामे एका निर्धना वृद्धाः स्त्री न्यवसत्।

**iii)** काकः तण्डुलान् खादितुम् आरब्धः।

**iv)** तस्या दुहिता विनम्रा मनोहरा चासीत्।

**v)** सा पुत्रीमादिदेशः – सूर्यातपे तण्डुलान् खगेभ्योः रक्षः।

**vi)** एको विचित्र काकः समुड्डीय तामुपजगाम।

**vii)** तं निवारयन्ती सा प्रार्थयत्– तण्डुलान् मा भक्षय।

**viii)** काकः दृष्ट्वा बालिका रोदितुमारब्धा।

**प्र0 19 अधोलिखित वाक्येषु रेखांकितपदानां प्रसंगानुसारम् उचितार्थ लिखत–** **(1X3=3)**

(निम्नलिखित वाक्यों में रेखांकित पदों के प्रसंगानुसार उचित अर्थ लिखिए) ***(केवलं प्रश्नत्रयम्)***

**i** पुत्र मातृ **<u>कुक्षौ</u>** सुरक्षितं भवति।

(क) कुले (ख) गर्भे

(ग) समीपे (घ) गृहे

**ii** **<u>प्रबुद्धः</u>** काकः बालिकां कथयति।

(क) आगतः (ख) मूर्खः

(ग) जाग्रतः (घ) बालकः

**iii** रावणः **<u>आशु</u>** जटायुं तलेन अभिजघान।

(क) अशीघ्रम् (ख) मन्दैः

(ग) अश्रु (घ) शीघ्रम्

**iv** गुण युक्तो **<u>दरिद्रः</u>** जनः अपि पूज्यते।

(क) धनवान् (ख) निर्धनः

(ग) धनयुक्तः (घ) समृद्धः

———00———

08/02/24